C 83946 (Pages : 2) Name.................................

Reg. No..............................

# M.A. (PREVIOUS) DEGREE (CBCSS) EXAMINATION APRIL/MARCH 2020

(PVT/SDE)

M.A. Sanskrit General (Previous)

SKT 08—COMPARATIVE LINGUISTICS

Time : Three Hours Maximum : 100 Marks

*Answers may be written* **either** *in Sanskrit* **or** *in English.*

*In writing Sanskrit Devanagari script should be used.*

I. Write essays on any *three* of the following. Each question carries 15 marks :

1 Discuss the main theories about the origin of Language.

2 Write an essay on Phonetic change giving special importance to its classification.

3 Write an essay on semantic change and its main causes.

4 Define Phonetic Laws and explain Fortunator's Law with examples.

5 Explain the geneological classification of languages.

(3 × 15 = 45 marks)

II. Write short essays on any *five* of the following :

6 Grimm's Law.

7 What are the criteria to determine that a language belongs to a particular family ?

8 Irradiation and Apophonia.

9 Classification of Analogy.

10 The organs of speech.

11 Obscure compounds.

12 Vedic Sanskrit.

(5 × 7 = 35 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

III. Write Philological notes on any *five*. Each question carries 4 marks :

13 Vanaspatiḥ.

14 Sátam.

15 Pravīṇaḥ.

16 Śvaśura.

17 Bride-groom.

18 Minister.

19 Father.

(5 × 4 = 20 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

C 83944 (Pages : 3) Name.....................................

Reg. No...................................

# M.A. (PREVIOUS) DEGREE [CBCSS] EXAMINATION, APRIL/MAY 2020

(PVT/SDE)

M.A. Sanskrit General (Previous)

SKT 06—SIDDHANTA KAUMUDI

Time : Three Hours Maximum : 100 Marks

I. **दश** सूत्राणि व्याख्यात :

1 अधिशीङ्स्थासां कर्म ।

2 कालाध्वनोरत्यन्तसंयोगे

3 कर्तृकरणयोस्तृतीया

4 स्वतन्त्रः कर्ता

5 धारेरूत्तमर्णः

6 ध्रुवमपायेऽपादानम्

7 पञ्चम्यपाङ्परिभिः

8 सप्तम्यधिकरणे च

9 स्पृहेरीप्सितः

10 आशिषि नाथः

11 भीत्रार्थानां भयहेतुः

12 षष्ठी चानादरे

13 यस्य च भावेन भावलक्षणम्

(10 × 3 = 30 marks)

II. **पञ्चानां** लकारविशेषं समर्थयत :

14 संप्रहरन्ते राजानः

15 अपि जायां त्यजसि

16 अपि गिरिं शिरसा भिन्द्यात्

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

17 धर्मादुच्चरते

18 यावद् भुङ्क्ते

19 नाथसे किमु पतिं न भूभृताम्

20 वृष्टिश्चेत् क्षिप्रं यास्यति

(5 × 3 = 15 marks)

III. सूत्रनिर्देशपूर्वकं दश प्रयोगान् समर्थयत :

21 शब्दं नित्यमातिष्ठते

22 हरिमुपकुरूते

23 मुक्तावुत्तिष्ठते

24 पराकरोति

25 धावतोऽश्वात् पतति

26 अनुकरोति

27 पयसा ओदनं भुङ्क्ते

28 जटाभिस्तापसः

29 शतस्य दीव्यति

30 दक्षिणेन ग्रामम्

31 अक्ष्णा काणः

32 राज्ञां मतः

33 ओदनं भुञ्जानो विषं भुङ्क्ते

(10 × 3 = 30 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

IV. पञ्चानां सूत्रनिर्देशपूर्वकं समासं लिखत :

34 मक्षिकाणाम् अभाव:

35 कृष्णं श्रित:

36 पूर्वं भूत:

37 घन इव श्याम:

38 कृष्ण: च असौ सर्प: च

39 पीतम् अम्बरं यस्य स:

40 जाया च पति: च

(5 × 4 = 20 marks)

V. एकमधिकृत्य लघुनिबन्धात्मकमुत्तरं लिखत :

41 अव्ययं विभक्तिसमीप......इत्यादिसूत्रं सोदाहरणं व्याख्यात ।

42 अकथितं च इति सूत्रम् उदाहरणप्रत्युदाहरणप्रदर्शनपूर्वकं व्याख्यात ।

(1 × 5 = 5 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**C 83943** (Pages : 3) Name.....................................

Reg. No.....................................

# M.A. (PREVIOUS) DEGREE [CBCSS] EXAMINATION, APRIL/MAY 2020

(PVT/SDE)

M.A. Sanskrit (General)—Previous

SKT 05—DHVANYALOKA I AND VYAKTIVIVEKA—I

Time : Three Hours Maximum : 100 Marks

संस्कृतभाषया देवनागर्याम् उत्तराणि देयानि ।

**'क' विभाग: (ध्वन्यालोके प्रथमोद्योत:)**

I. वाक्येन वाक्याभ्यां व **दश** प्रश्नानाम् उत्तराणि लिखत :

1 ध्वन्यालोक: इति पदस्य कोऽर्थ: ?

2 बुधै: इति पदस्य वृत्तिकारेण कोऽर्थ: प्रतिपादयत: ?

3 "यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु" इत्यत्र तच्छब्देन किं वस्तु परामृष्टमस्ति ?

4 शब्दार्थशसनज्ञानमात्रेणैव न वेद्यते इत्यत्र शब्दार्थशासनं नाम किं भवति ?

5 ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति । अत्र तच्छब्देन के परामृष्टा: ?

6 स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनां सरस्वती किम् अभिव्यनक्ति ?

7 आदिकवे: कीदृश: शोक: श्लोकत्वमागत: ? अत्र शोको नाम क: भवति ?

8 भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनि: इति कारिकांशस्य अर्थं लिखत ।

9 स्वेच्छाकेसरिण: मधुरिपो: नखा: कीदृशा: ?

10 अविवक्षितवाच्यध्वने: उदाहरणं यथाग्रन्थं लिखत ।

11 प्रपन्नार्तिच्छिद: इति पदस्य विग्रहमर्थश्च लिखत ।

12 "केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयम्" इत्यत्र केचित् इत्यनेन के निर्दिष्टा इति वृत्तिभागानुसारेण लिखत ।

13 "अपि च सङ्करालङ्कारेऽपि च क्वचित्सङ्करोक्तिरेव ध्वनिसम्भावनां निराकरोति" इति ग्रन्थवाक्यस्यार्थं लिखत ।

(10 × 1.5 = 15 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

II. अधोनिर्दिष्टेषु **पञ्च** व्याख्यात :

14 योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।

वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ।।

15 यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः । केवलाच्च स्वबाभिधानाद् अप्रतीतिः । तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम् ।

16 सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।

यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ।।

17 व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः ।

वाच्यवाचकचारूत्वहेत्वन्तःपातिता कुतः ।।

18 उक्त्यन्तरेणाशक्यं यत्तच्चारूत्वं प्रकाशयन् ।

शब्दो व्यञ्जकतां बिभ्रद्ध्वन्युक्तेर्विषयीभवेत् ।।

19 अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।

अहो दैवगतिः कीदृक् तथापि न समागमः ।।

20 आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः ।

दतुपायतया तद्वदर्थे वाच्ये तदादृतः ।।

(5 × 5 = 25 marks)

III. अन्यतरस्योत्तरं निबन्धरूपेण लिखत :

21 ध्वनेरभाववादिनां विचारान् यथाग्रन्थं स्ववाक्यैः लिखत ।

22 समासोक्त्यादौ ध्वनिः कथं नान्तर्भवतीति ग्रन्थानुसारेण प्रतिपादयत ।

(1 × 10 = 10 marks)

**'ख' विभागः (व्यक्तिविवेक प्रथमविमर्शः)**

IV. वाक्येन वाक्याभ्यां व **दश** प्रश्नानाम् उत्तराणि लिखत :

23 व्यक्तिविवेके कति विमर्शाः सन्ति ?

24 "महतां संस्तव एव गौरवाय" इत्यस्य कोऽर्थः ?

25 कति पदभेदाः महिमभट्टेन स्वीकृताः ? के च ते ?

26 'भावप्रधानमाख्यातम्' इत्यस्य कोऽर्थः ?

CHMK LIBRARY UNIVERSITY OF CALICUT

27 उपसर्गनिपातकर्मप्रवचनीयानां सामान्यं लक्षणं किम् ?

28 मुख्यस्य अर्थस्य लक्षणं किम् ?

29 व्यक्तिविवेक इति पदस्य विग्रहमर्थश्च लिखत ।

30 अश्वति बालेयः इति वाक्यात् महिमभट्टमतेन कथम् अर्थबोधः ?

31 प्रकाशकस्य अर्थस्य द्वैविध्यं प्रदर्शयत ।

32 समुद्यतादृष्टदर्पणा मम धीः इत्यस्यार्थं स्पष्टयत ।

33 विपच्य घटो भवति इत्यत्र महिमभट्टमतेन विपचनक्रियायाः पौर्वकाल्यं किमपेक्षम् ?

34 अलङ्काराणाम् अभिधात्मत्वस्वीकारे कारणं किम् ?

35 प्रतिषेधद्वयस्य विषयः कः ?

(10 × 1.5 = 15 marks)

V. अधोनिर्दिष्टेषु पञ्च व्याख्यात :

36 प्रमाणं द्विविधं स्मृतम् ।

37 अन्यद्धि व्युत्पत्तिनिमित्तम् अन्यच्च प्रवृत्तिनिमित्तम् ।

38 एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ।।

39 मणिप्रदीपप्रभयोर्मणि बुद्ध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थ क्रियां प्रति ।।

40 शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिङ्गता ।
न व्यञ्जकत्वमनयोः समस्तीत्युपपादितम् ।।

41 उक्तं गुणीकृतात्मत्वं यदर्थस्य विशेषणम् ।
गमकत्वान्न तत्तस्य युक्तमव्यभिचारतः ।।

42 अर्थस्य तावदुपसर्जनीकृतात्मत्वमनुपादेयमेव ।

(5 × 5 = 25 marks)

VI. अन्यतरस्य निबन्धरूपेणोत्तरं लिखत :

43 ध्वनिलक्षणे महिमभट्टेन उद्भावितान् दश दोषान् सामान्येन प्रतिपादयत ।

44 अभिव्यक्तेः स्वरूपं प्रभेदान् च यथाग्रन्थं निरूपयत ।

(1 × 10 = 10 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

C 83941 (Pages : 2) Name.......................................

Reg. No....................................

# M.A. (PREVIOUS) DEGREE [CBCSS] EXAMINATION, APRIL/MAY 2020

(PVT/SDE)

M.A. Sanskrit General (Previous)

SKT 03—MAHABHASHYA AND NIRUKTA

Time : Three Hours Maximum : 100 Marks

## Part A (Mahabhashya Paspashahnika)

I. Explain any *five* of the following :

1 गौरित्यत्र क: शब्द: ?

2 किं च भो: श्लोका अपि प्रमाणम् इति भाष्यं सप्रसङ्गं व्याख्यात ।

3 बृहस्पतिरिन्द्राय कथं विद्यामुपदिष्टवान् ?

4 व्याख्यानतो विशेषप्रतिपत्ति: नहि सन्देहादलक्षणम् । सप्रसंङ्ग व्याख्यात ।

5 शब्दस्य ज्ञाने धर्मश्चेत् महानधर्मोऽपि प्राप्नोति इति स्पष्टयत ।

6 "अप्रयोग: प्रयोगान्यत्वात्" व्याख्यात ।

7 किं शब्दोपदेश: कर्तव्य: आहोस्विदपशब्दोपदेश:, अहोस्विदुभयोपदेश इति स्पष्टयत ।

(5 × 4 = 20 marks)

II. Answer any *five* in one paragraph each :

8 तेऽसुरा: ।

9 यस्तु प्रयुङ्क्ते ।

10 अविद्वांस:

11 उत त्व: ।

12 दशम्यां पुत्रस्य

13 आम्राश्च सिक्ता: पितरश्च प्रीणिता:

14 किं अथवा कूपखानकवदेतद् भविष्यति ।

(5 × 4 = 20 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

III. Write an essay on any one of the following :

15 सिद्धे शब्दार्थसम्बन्धे इति भाष्यवचनं विस्तरेण व्याख्यात ।

16 शब्दानुशासनसस्य प्रयोजनानि यथाभाष्यं प्रतिपादयत ।

(1 × 10 = 10 marks)

## Part B (Niruktam First Chapter)

IV. Write short notes on any *four* :

17 इन्द्रियनित्यं वचनमौदुम्बरायण: ।

18 एवमुच्चावचानर्थान् प्राहुस्त उपेक्षितव्या: ।

19 तत्र नामान्याख्यातजानीति शाकटायनो नैरूक्तसमयश्च ।

20 व्याप्तिमत्वात्तु शब्दस्य ।

21 समुच्चयार्थीऽया: निपाता:

22 निरुक्तस्य विद्यास्थानत्वम् ।

(4 × 4 = 16 marks)

V. Derive the forms of any *six* of the following :

23 गिरिष्ठा:

24 शिशिरम्

25 चक्षु:

26 शाखा

27 हस्त:

28 वीर:

29 पृथिवी

30 शश्वत् ।

(6 × 4 = 24 marks)

VI. Write an essay on any *one* of the following :

31 चत्वारि पदजातानि प्रत्येकं विशदयत ।

32 मन्त्रा: अनर्थका: इति कौत्समतम् प्रतिपादयत ।

(1 × 10 = 10 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

C 83940 (Pages : 4) Name.................................

Reg. No.................................

# M.A. (PREVIOUS) DEGREE [CBCSS] EXAMINATION, APRIL/MAY 2020

(PVT/SDE)

M.A. Sanskrit General (Previous)

SKT 02—DRAMATURGY

Time : Three Hours Maximum : 100 Marks

संस्कृतभाषायां देवनागर्याम् उत्तराणि देयानि ।

## Part A (NĀṬYAŚĀSTRA - VI)

I. अन्यतरस्य उपन्यासरूपेण उत्तरं लिखत :

1 अभिनवगुप्तानुसारेण रसविघ्नान् विस्तरेण प्रतिपादयत ।

2 नाट्यसङ्ग्रहान् सामान्येन निरूप्य अभिनयभेदान् निरूपयत ।

(1 × 10 = 10 marks)

II. अन्यतरस्य उपन्यासरूपेण उत्तरं लिखत :

3 अभिनवभारतीदिशा भट्टनायकाभिमतम् रससूत्रव्याख्यानं स्ववाक्यै: लिखत ।

4 नाट्यशास्त्रानुसारेण हास्यरसस्य स्वरूपं विभावानुभावव्यभिचारिण: भेदान् च प्रदर्शयत ।

(1 × 10 = 10 marks)

III. पञ्च अधिकृत्य लघूपन्यासं लिखत :

5 निरूक्तस्य लक्षणम् ।

6 नहि रसादृते कश्चिदर्थ: प्रवर्तते ।

7 तथा मूलं रसा: सर्वे तेभ्यो भावा व्यवस्थिता: ।

8 करूणरस: ।

9 षष्ठे अध्याये भरतं प्रति मुनिभि: पृष्टा: प्रश्ना: ।

10 रसानाम् उत्पत्तिहेतव: रसा: के ? प्रत्येकं तेभ्य: के के रसा उत्पन्ना: ?

11 गानस्य पञ्च भेदा: ।

(5 × 4 = 20 marks)

Turn over

CHMK LIBRARY UNIVERSITY OF CALICUT

IV. एकैकया खण्डिकया सप्त अधिकृत्य उत्तरं लिखत :

12 वीररसस्य भेदाः ।

13 कारिकालक्षणम् ।

14 रसानां वर्णाः ।

15 वृत्तयः

16 भयानकरसः

17 भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।

18 चित्रतुरगन्यायः

19 धर्मी

20 बीभत्सः

(7 × 2 = 14 marks)

V. वाक्येनैकेन द्वाभ्यां वा षण्णाम् उत्तराणि लिखत :

21 अभिनवगुप्तमतेन अधिकारिलक्षणम् ।

22 अत्र हि स्मरतीति या स्मृतिरूपदर्शिता सा न तार्किकप्रसिद्धा । कुत्र ?

23 "न शक्यमस्य नाट्यस्य गन्तुमन्तं कथञ्चन" । कस्मात् ?

24 चतुर्विधम् आतोद्यं स्पष्टयत ।

25 सात्विकभावान् नामतो निर्दिशत ।

26 रङ्गः त्रिविधः । नामतो निर्दिशत ।

27 व्यभिचारिभावाः कति समाख्याताः ?

28 नाट्यशास्त्रे कति अध्यायाः सन्ति ?

(6 × 1 = 6 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT

**Part B (Dasarupaka III)**

VI. अन्यतरस्योत्तरम् उपन्यासरूपेण लिखत :

29 दशरूपकानुसारेण प्रकरणलक्षणं लिखत ।

30 सोदाहरणं प्रस्तावनायाः लक्षणं लिखत ।

(1 × 10 = 10 marks)

VII. खण्डिकयैकया द्वाभ्यां वा षण्णाम् उत्तरं लिखत :

31 भारतीवृत्तेः लक्षणं तस्या अङ्गानि च लिखत ।

32 नाटिकायाः विषये दशरूपककारस्य विचारान् नाटिकायाः लक्षणं च लिखत

33 भाणस्य लक्षणमुदाहरणञ्च यथाग्रन्थं विचारयत ।

34 लास्याङ्गानि सोदाहरणं लक्षयत ।

35 उत्सृष्टिकाङ्कस्य लक्षणं निरूपयत ।

36 इत्थं विचिन्त्य दशरूपकलक्ष्ममार्ग –

मालोक्य वस्तु परिभाव्य कविप्रबन्धान् ।

कुर्यादयत्नवदलंकृतिभिः प्रबन्धं

वाक्यैरूदारमधुरैः स्फुटमन्दवृत्तैः ।।

इति श्लोकं व्याख्यात ।

37 "आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः" इत्यस्य सप्रसङ्गमर्थं लिखत ।

38 एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।

पात्रप्रवेशो यत्रैष प्रयोगातिशयो मतः ।।

इति कारिकां सप्रसङ्गं व्याख्यात ।

(6 × 4 = 24 marks)



CHMK LIBRARY UNIVERSITY OF CALICUT

VIII. वाक्येन वाक्याभ्यां वा **षण्णाम्** उत्तरं लिखत :

39 **दशरूपके** तृतीये प्रकाशे क्रमप्राप्तं रसविचारं किमर्थम् अत्यजत् ?

40 दशरूपकस्य तृतीयप्रकाशस्य नाम किम् ?

41 ईहामृगे रूपकविशेषे कति अङ्काः स्युः ?

42 समवकारशब्दस्य कोऽर्थः ?

43 षोडशात्यन्तमुद्धताः नेतारः कस्मिन् रूपकविशेषे निर्दिष्टाः सन्ति ?

44 कति सन्ध्यङ्गानि स्वीकृतानि सन्ति ?

45 मृदवस्य लक्षणं किम् ?

46 उद्घात्यकम् कतिविधम् ?

(6 × 1 = 6 marks)

CHMK LIBRARY UNIVERSITY OF CALICUT